[६९७] विभक्तिनिमित्तस्वराच्च नञ्स्वरो बलीयान् इति वक्तव्यम् । (म. भा. ३. १००)

अचत्वारः, अननड्वाहः इति । यस्य विभक्तिनिमित्तमामः, तस्य यदुदात्तत्वं तन्नञ्स्वरेण बाध्यते ।

पदग्रहणं किम् ? देवदत्त गामभ्याज शुक्लाम् इति वाक्ये हि प्रतिपदं स्वरः पृथग् भवति । परिमाणार्थं चेदं पदग्रहणं [1]पदाधिकारस्य निवृत्तिं करोति । तेन प्रागेव पदव्यपदेशात् स्वरविधिसमकालमेव [2]शिष्टस्यानुदात्तत्वं भवति । तथा च कुवल्या विकारः कौवलम् इत्यत्रानुदात्तादिलक्षणोऽञ् सिद्धो भवति । [3]तथा गर्भिणीशब्दश्चानुदात्तादिलक्षणस्य अञो बाधनार्थं भिक्षादिषु पठ्यते । कुवलगर्भशब्दौ आद्युदात्तौ ॥

## कर्षात्वतो घञोऽन्त उदात्तः । (१५९/३६८०)

कर्षतेर्धातोराकारवतश्च घञन्तस्यान्त उदात्तो भवति । कर्षः । पाकः । त्यागः । रागः । दायः । धायः । 'ञ्नित्यादिर्नित्यम्' (६. १. १९७/३६८६) इत्यस्यापवादः । कर्षः इति विकृतनिर्देशः कृषतेर्निवृत्त्यर्थः । तौदादिकस्य घञन्तस्य कर्षः इत्याद्युदात्तः एव भवति ॥

## उञ्छादीनां च । (१६०/३६८१)

उञ्छ इत्येवमादीनामन्त उदात्तो भवति । उञ्छः, म्लेच्छः, [4]जञ्जः, जल्पः एते घञन्ताः [5]इति ञित्स्वरः प्राप्तः । जपः, [6]व्यधः इत्यबन्तौ, तयोर्धातुस्वरः प्राप्तः । केचित्तु वधः इति पठन्ति । युगः । युजेर्घञन्तस्य निपातनादगुणत्वं विशिष्ट[7]विषये च निपातनमिदमिष्यते । कालविशेषे रथाद्युपकरणे च युगशब्दस्य प्रयोगः[8], अन्यत्र हि योगः एव भवति । 'गरो दूष्येऽबन्तः' (ग. सू. १६२) । गरशब्दोऽबन्तः, स दूष्य एवान्तोदात्तः[9] । गरो विषम् । अन्यत्राद्युदात्त एव[10] । 'वेदवेगवेष्टबन्धाः करणे' (ग. सू. १६३) । 'हलश्च' (३. ३. १२१/३००) इति घञन्ता एते करणेऽन्तोदात्ता भवन्ति । भावे आद्युदात्ता एव । 'स्तुयुद्रुवश्छन्दसि' (ग.सू. १६४) । उपसमस्तार्थमेतत् । परिष्टुत् । संयुत् । परिद्रुत् । 'वर्तनिः स्तोत्रे' (ग.सू. १६५) । स्तोत्रं साम । तत्स्थो वर्तनिशब्दोऽन्तोदात्तो भवति, अन्यत्र मध्योदात्तः[11] । 'श्वभ्रे दरः' (ग.सू. १६६) । श्वभ्रेऽभिधेये दरशब्दोऽन्तोदात्तः[12], अन्यत्राबन्तत्वादाद्युदात्तः[13] । 'साम्बतापौ भावगर्हायाम्' (ग. सू. १६७) । अन्तोदात्तौ, अन्यत्राद्युदात्तौ । 'उत्तमशश्वत्तमौ सर्वत्र' (ग. सू. १६८) । केचित्तु भावगर्हायाम् इत्यत्रापि अनुवर्तयन्ति । 'भक्षमन्थभोगदेहाः' (ग. सू. १६९) एते घञन्ताः । भक्षिर्ण्यन्तोऽपि घञन्त एव, 'एरच्' (३. ३. ५६/३२३१) अण्यन्तानाम् इति वचनात् ॥

---

1. पदाधिकस्य क. 2. परिशिष्टस्य क. ड, अनुशिष्टस्य फ. ह. 3. तथा नास्ति फ. 4. जञ्जः नास्ति फ. 5. इति नास्ति फ. 6. वधः ड. फ. ह. 7. विषयत्वं च क. फ. 8. दृश्यते इत्यधिकम् फ. 9–10. भवति इत्यधिकम् फ. 11. एव इत्यधिकम् क. ह. 12. भवति इत्यधिकम् फ. 13. एव इत्यधिकम् फ. ह.